लोकप्रियसाहित्यग्रन्थमाला-७३

आधुनिकसंस्कृतकाव्यसङ्ग्रहः


# वासकसज्जा ज्योत्स्ना

प्रधान सम्पादक :

प्रो. परमेश्वरनारायणशास्त्री

( कुलपति )

डॉ० हर्षदेवमाधवः



राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम् )

नवदेहली

# पुरोवाक्

संस्कृतकाव्यसंसारे हर्षदेवमाधवो 'नवनवोन्मेषशालिप्रतिभावान् कविः' वर्तते। काव्यनाटकसमीक्षाविवेचन-काव्यशास्त्रादिविषयेषु तस्य प्रतिभा नित्यनूतनं किमपि वस्तु सृजति। संस्कृतकाव्येषु अनेन कविना हाइकु-तान्का-सीजो-लघुबिम्बकाव्य-खण्डकाव्य-संवादकाव्य-परमवास्तववादयुतानां नानाविधानां काव्यानां सर्जनं कृत्वा संस्कृते आधुनिकता स्थापिता। वागीश्वरीकण्ठसूत्रं नवं काव्यशास्त्रं सृष्ट्वा आधुनिककाव्यशास्त्रमानदण्डा अपि संस्कृते तेन स्थापिताः। 'पिपीलिका विपणीं गच्छति' इति काव्यसङ्ग्रहेण तेन बालसाहित्येऽपि नवा परम्परा स्थापिता।


'वासकसज्जा ज्योत्स्ना' तस्य द्वितीयो 'हाइकु' काव्यसङ्ग्रहोऽस्ति। प्रथमः सङ्ग्रहः 'ऋषेः क्षुब्धे चेतसि' 2008 तमे संवत्सरे प्रकाशितः। 'हाइकु' 'तान्का' इत्याख्ये काव्यस्वरूपे लघुके स्तः। सुविदितमेतद् यद् इयं 'हाइकु' सप्तदशाक्षरी जापानदेशस्य विश्रुता काव्यविधा, संप्रति स्वदेशकालयोः परिधिमतिक्रम्य विश्ववाङ्मयस्य निधिः सञ्जातः। फ्रान्सदेशे 'हाइकाइ', आङ्ग्लदेशे होक्कु, अमेरिकायां 'हाइकु' इति संज्ञया अभिज्ञाता वर्तते विधेयम्। कविना बिल्वपत्रमिति नाम दत्तमस्मै काव्याय। भारतीयसाहित्येऽपि विधेयं सूर्योदयस्य देशतः समानीता क्रमशः पञ्च, सप्त, पञ्च इति अक्षरान्वितं सप्तदशाक्षरं त्रिपङ्क्तिकाव्यं लाघवप्रधानं व्यञ्जनागर्भं भवति। वामनरूपेणैव भगवता चक्रपाणिना भुवनत्रयं विजितम्। तथैव संपूर्णं काव्यचित्रं प्रदर्शयद् हाइकुकाव्यमपि वाचकानां हृदयानि जयति वशीकरोति च रसिकानां चेतांसि नवनवैर्भावैः नवनवोन्मेषशालिन्या प्रतिभया। झेनसाधुभिः जापानदेशे हाइकुकाव्यानां सर्जनं कृतम्। अतः हाइकुकाव्यम् आध्यात्मिकचिन्तनगर्भमपि भवेत्। हाइकुकाव्ये व्यञ्जना यथा–

**अवकरिका/**
**निक्षिप्तास्सन्ति बन्ध्या**
**ऊषरक्षणाः ॥ 5 ॥**

कचरे की टोकरी –
फैंके हैं उसमें
कुछ बंजर क्षण।

**किरातः / श्येनो**
**गतौ व्याधश्चापल्ये**
**क्रौर्ये भल्लुकः ॥ 6 ॥**

शिकारी / गति में है
वह बाज़, चपलता में बाघ
क्रूरता में है भालू।



राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम् )
नवदेहली